**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2023 SHISRRJ | Volume 6 | Issue 6
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# लकारेषु विधिः

डॉ. दिनेश चौबे
सहायकाचार्यः, महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जयिनी।

**Article Info**
**Publication Issue :**
November-December-2023
Volume 6, Issue 6
**Page Number :** 221-226

**Article History**
Received : 02 Dec 2023
Published : 21 Dec 2023

**सारांशः**-प्रकृतिप्रत्ययोपदेशपुरस्सरपदस्वरूपप्रतिष्ठापकत्वाद् अर्थनिर्णयनकृतसाधनेषु अन्यतमसाधनत्वेन प्रयुक्तत्वात् व्याकरणं नामाङ्गं नितान्तमेव महनीयं श्रेष्ठम् अपेक्षितञ्च। व्याकरणतन्त्रे धातुरेव मूलप्रकृतिः स्वीक्रियते। व्याकरणशास्त्रे दश लकाराः वर्तन्ते। तान् दशलकारान् बोधसौकर्याय ग्रन्थकर्त्रा टितः ङितश्चेति भेदेन द्विधा विभागः कृतः। तत्र लट् लिट् लुट् लृट् लेट् लोट् इति षट् टितः लकाराः वर्तन्ते। लङ् लिङ् लुङ लृङ् इति चत्वारो ङितो लकारा वर्तन्ते इति विभागः। एते लकाराः सकर्मकेभ्यः धातुभ्यः कर्तरि कर्मणि च भवन्ति। अकर्मकेभ्यः धातुभ्यः कर्तरि भावे च भवन्ति। एतेषु लकारेषु विध्यर्थकलकाराणां विचारपुरस्सरं विध्यर्थः मया प्रस्तूयते।

**विशेषशब्दाः** –धातुः, लकाराः, नैयायिकः, मीमांसा, विधिः, प्रेरणा,भावना, प्रवर्तना इत्यादयः।

**भूमिका** - धर्मस्य मूलं भवति वेदः। अयं परमात्मनो निश्वासभूतो वेदः सर्वासामपि विद्यानामाधारभूतस्थलो विद्यत इत्यत्र नास्ति कश्चिदपि संशयः। वेदस्य च सुप्रसिद्धेषु षडङ्गेषु मुखत्वेन व्याकरणं स्मृतम्। अर्थात् परमपुरुषस्य मुखस्थानमलङ्कुर्वद् विद्यत इदं व्याकरणशास्त्रमिति। वेदानां रक्षकत्वात्, वेदार्थावबोधने सहायकत्वात् प्रकृतिप्रत्ययोपदेशपुरस्सरपदस्वरूपप्रतिष्ठापकत्वाद् अर्थनिर्णयनकृतसाधनेषु अन्यतमसाधनत्वेन प्रयुक्तत्वात् व्याकरणं नामाङ्गं नितान्तमेव महनीयं श्रेष्ठम् अपेक्षितञ्च। व्याकरणतन्त्रे धातुरेव मूलप्रकृतिः स्वीक्रियते। दधाति सकलान् अर्थान् इति विग्रहे **डुधाञ् धारणपोषणयोः** धातोः औणादिकतुन्प्रत्यये धातुशब्दो निष्पद्यते। अनेकार्थोऽयं धातुः लोके दृष्टेऽपि शब्दशास्त्रे **भूवादयो धातवः**[1] इति सूत्रप्रामाण्यात् भ्वादिगणपठितानुपूर्वीसदृशानुपूर्वीक्रियावाचकः शब्दः पाणिनिसंकेत-सम्बन्धेन धातुपदवानेव धातुशब्देन गृह्यते बोध्यते च। व्याकरणशास्त्रे दश लकाराः वर्तन्ते। तान् दशलकारान् बोधसौकर्याय ग्रन्थकर्त्रा टितः ङितश्चेति भेदेन द्विधा विभागः कृतः। तत्र लट् लिट् लुट् लृट् लेट् लोट् इति षट् टितः लकाराः वर्तन्ते। लङ, लिङ्, लुङ लृङ् इति चत्वारो ङितो लकारा वर्तन्ते इति विभागः। एते लकाराः सकर्मकेभ्यः धातुभ्यः कर्तरि कर्मणि च भवन्ति। अकर्मकेभ्यः धातुभ्यः कर्तरि भावे च भवन्ति। एतेषु लकारेषु विध्यर्थकलकाराणां विचारः मया प्रस्तूयते।

[1]. पाणिनिसूत्रम् 1.3.1

**Copyright © 2023 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)** which permits unrestricted use, distribution, and reproduction in any medium for non-commercial use provided the original author and source are credited.

**विधि:- विधिनिमन्त्रणामन्त्रणाधिष्टसम्प्रश्नप्रार्थनेषु लिङ्**[2] लोट् च इति सूत्राभ्यां विध्याद्यर्थेषु लिङ्लोटौ विहितौ। लिङर्थे लेट् इति सूत्रेण वेदे लेट् लकार: विहित:। विध्यादयश्च विधि:, निमन्त्रणम्, आमन्त्रणम्, अधीष्टम्, सम्प्रश्न:, तथा प्रार्थना[3]। अत्र सूत्रेषु विधिनिमन्त्रणामन्त्रणाधीष्ट इति चतुष्टये अनुस्यूततया अर्थात् एकरूपेण प्रवर्तनात्वस्य स्थितत्वात् प्रवर्तना एव विधेरर्थ:। लोके सर्वोऽपि इष्टसाधनत्वमेव ज्ञात्वैव क्रियायां प्रवर्तते इति इष्टसाधनत्वमेव प्रवर्तना। तस्य विधित्वे प्रमाणं **हेतुमति च**[4] इति सूत्रभाष्यम् – **नेह कश्चित्परोनुग्रहीतव्य इति प्रवर्तते। सर्व इमे स्वभूत्यर्थं प्रवर्तन्ते। ये तावदेते गुरुशुश्रूषवो नाम तेऽपि स्वभूत्यर्थं प्रवर्तन्ते। पारलौकिकं च नो भविष्यति, इह च न: प्रीतो गुरुरध्यापयिष्यतीति। तथा य एते दासा: कर्मकरा नाम तेऽपि स्वभूत्यर्थं प्रवर्तन्ते। भक्तं चैलं च लप्स्यामहे। परिभाषाश्च न नो भविष्यन्तीति। तथा य एते शिल्पिनो नाम एतेऽपि स्वभूत्यर्थे प्रवर्तन्ते वेतनं च लप्स्यामहे। मित्राणि च नो भविष्यन्तीति**। अतश्च ज्ञायते प्राचीनवैयाकरणां मते इष्टसाधनत्वमेव विधेरर्थ:।

**प्राचीननैयायिकमतम्**– न्यायसूत्रकारेण **विधिर्विधायक:**[5] इति न्यायसूत्रे निरुक्तस्य विधिशब्दस्य अर्थ: – यद्वाक्यं विधायकं स चोदकं स विधि: इति उच्यते। तत्र च भाष्यकार: **विधिस्तु नियोगोऽनुज्ञा वा** इति। **यदाक्यं विधायकं देशकं स विधिरिति** वार्त्तिककार:। एतेन प्रवर्तकस्य वाक्यस्य विधित्वेन व्यवहार: इति सिद्ध्यति। ततश्च यजेत इत्यादिशब्दश्रवणानन्तरं यमर्थं ज्ञात्वा प्रवर्तते तदर्थज्ञापकं वाक्यं विधिरिति सिद्ध्यति। लोके च सर्वोऽपि इष्टसाधनत्वं ज्ञात्वैव प्रवर्तते इति इष्टसाधनत्वमेव विध्यर्थ:। तदुक्तं प्रयोजनलक्षणव्याख्यायां न्यायवार्तिककारेण - **इदं सुखसाधनमिति बुध्वा सुखावाप्तये यतते। इदं दु:खसाधनमिति चावगम्य दु:खहानाय** इति। अर्थात् इष्टसाधनत्वमेव विध्यर्थ: इति प्राचीननैयायिकानां मतम्।

**न्यायकुसुमाञ्जलिकारस्य मतम्-** न्यायकुसुमाञ्जलिकार: उदयनाचार्योऽपि वदति

**विधिर्वक्तुरभिप्राय: पृत्यादौ लिङादिभि:।**
**अभिधेयोऽनुमेया तु कर्तुरिष्टाभ्युपायता॥**

इति श्लोकेनेदं विज्ञातं भवति यत् प्रवर्तना एवं विधि:। अर्थात् प्रवृत्तिविषयकोऽयमस्मिन प्रवर्तताम् इत्याकारक: आप्तस्य वक्तुरभिप्राय एव विधिरिति, स एव च लिङादिभिरभिधीयते इति चाकथयत्। तद्यथा **गामानय** इति प्रयोजकवाक्यं

---

[2]. पाणिनिसूत्रम् 3.3.162

[3]. तत्र विधि: अर्थात् प्रेरणा आज्ञा वा। सामान्यरूपेण भृत्यम् सेवकं प्रति यादृश: व्यवहार: क्रियते, तादृशं व्यवहारम् दर्शयितुम् लिङ्लकार: प्रयुज्यते। यथा राजा सेवकं ब्रूते वस्त्रं क्षालये:। निमन्त्रणम् अर्थात् श्राद्धभोजनादिषु दौहित्रादे: प्रवर्तनम्। यथा इह श्राद्धे भवान् भुञ्जीत। निमन्त्रणस्य स्वीकार: एव कर्तव्य:, तस्य अस्वीकारं न कर्तुं शक्यते। आमन्त्रणम् अर्थात् कामचारानुज्ञा। यथा यथेच्छम् इह भवान् भुञ्जीत। आमन्त्रणस्य स्वीकार: अपि कर्तुं शक्यते, अस्वीकार: अपि कर्तुं शक्यते, अत यथेच्छम् इति प्रयुक्तम् अस्ति। अधीष्टम् इति सत्कारपूर्वक: व्यापार: अर्थात् धनादिं दत्त्वा व्यापार:। यथा मम पुत्रम् अध्यापयेत् भवान्। सम्प्रश्न: अर्थात् कर्तव्याकर्तव्यविषयक: प्रश्न:। यथा किम् स: व्याकरणम् पठेत्? प्रार्थना अर्थात् याचना। यथा भवान् मे अन्नं दद्यात्।

[4]. पाणिनिसूत्रम् 3.1.26

[5]. पाणिनिसूत्रम् 2.1.63

श्रुत्वा बालः अयं प्रयोजकः वृद्धः इच्छति, यदयं गवानयने प्रवर्तताम्, एवञ्च गवानयनं मदिष्टसाधनत्वमित्यनुमिनोति, ततः प्रवर्तते इति **आप्ताभिप्राय** एव विधिः।

**नव्यनैयायिकमतम्** - प्राचीनानां मते यथा इष्टसाधनत्वे एतादृशं प्रवर्तनात्वं वर्तते तथा कृतिसाध्यत्वेऽपि वर्तते। तस्मात्कृतिसाध्यत्वमपि विध्यर्थः इति नवीनाः। अन्यथा इष्टसाधनताबुद्धिमात्रस्य प्रवृत्तिजनकत्वस्वीकारे **चन्द्रगमनं मदिष्टसाधनमिति** वाक्ये इष्टसाधनताबुद्धौ सत्यामपि कृतिसाध्यत्वाभावात् चन्द्रगमने प्रवृत्तिर्न जायते इति कारणे सत्वेऽपि कार्याभावात् कार्यकारणभावस्य व्यभिचारः स्यात्। अतः इष्टसाधनत्वामात्रस्य न प्रवृत्तिजनकविषयतावच्छेदकत्वरूपं प्रवर्तनात्वम् अपि तु इष्टसाधनात्वविशिष्टकृतिसाध्यत्वस्य। कृतिसाध्यताज्ञानस्यापि प्रवृत्तिजनकत्वस्वीकारे तु चन्द्रगमने इष्टसाधनताबुद्धौ सत्यामपि कृतिसाध्यताज्ञानं नास्ति इति कारणाभावात् तत्र प्रवृत्तिर्वार्यते इति तत्र न व्यभिचारः। एवमेव बलवदनिष्टाननुबन्धित्वज्ञानमपि प्रवृत्तिजनकमिति मन्तव्यम्। तथा च प्रवृत्तिजनकं यत् ज्ञानं इष्टसाधनात्वविशिष्टकृतिसाध्यत्वविशिष्टबलवदनिष्टाननुबन्धित्वज्ञानम् तद्विषयतावच्छेदकत्वरूपं प्रवर्तनात्वम् इति स्वीक्रियते। बलवदनिष्टाननुबन्धित्वज्ञानस्यापि प्रवृत्तिजनकत्वास्वीकारे विषसंपृक्तमधुभोजने कर्मणि पुरुषस्य इष्टसाधनताबुद्धिरस्ति, कृतिसाध्यताबुद्धिरपि वर्तते इति तत्र प्रवृत्तिस्स्यात् इति अनिष्टापत्तिः। परन्तु बलवदनिष्टाननुबन्धित्वज्ञानस्यापि प्रवृत्तिहेतुत्वस्वीकारे तु तत्र विषसंपृक्तमधुभोजने इदं भोजनं मदनिष्टं मरणं साधयतीति अनिष्टानुबन्धित्वज्ञानमेवास्ति। न तु अनिष्टाननुबन्धित्वज्ञानमिति न तादृशे कर्मणि प्रवृत्तिः। अर्थात् नैयायिकानां किमपि भिन्नमेव मतं विद्यते। तेषां मते – १. बलवदनिष्टाननुबन्धित्वम् २. इष्टसाधनत्वम् ३. कृतिसाध्यत्वम् इत्येते त्रयः विध्यर्थाः ते धात्वर्थगताश्चेति स्वीकुर्वन्ति।

**भाट्टमतम्**– विध्यर्थे भाट्टमीमांसकाः वैयाकरणा इव इष्टसाधनत्वं विधिरिति स्वीकुर्वन्ति। तथाहि **चोदनालक्षणोऽर्थो धर्मः**[6] इति सूत्रभाष्ये प्रोक्तं – **चोदना क्रियायाः प्रवर्तकं वचनमाहुः। य एव श्रेयस्करः स एव धर्मः शब्देनोच्यते**। तस्मात् श्रेयस्साधनत्वं धर्मस्य सिद्धम्। तस्मात् इष्टसाधिकैव प्रवर्तना। तत्र अत एव भाटैरुच्यते श्लोकवार्तिके [7]

**प्रवृत्तौ वा निवृत्तौ वा यः शब्दश्रवणेन धीः।**
**सा चोदनेति सामान्यं लक्षणं हृदये स्थितम्॥**

अस्यायमर्थः– दर्शपूर्णमासाभ्यां **स्वर्गकामो यजेत** इत्यादौ प्रवृत्तौ, **न कलञ्जं भक्षयेत्** इत्यादिनिवृत्तौ च तत्तद्वाक्यश्रवणेन यज्ज्ञानम् **इदं मदिष्टसधनम्, इदम् अनिष्टसाधनम्** इति भवति, सैव चोदना प्रवर्तनेति वा उच्यते। यत्कर्म च अनर्थत्वेन नानुबध्यते केवलप्रीतिहेतुश्च भवति स धर्मः। ननु केवलेष्टसाधनताज्ञानस्यैव प्रवर्तकत्वे तस्य श्येनेनेत्यादावपि सत्त्वात् तस्यापि धर्मतापत्तिरिति न वक्तव्यम्। यतो हि श्येनादेः फलमधर्मः। येन कर्मणा अनिष्टाननुबन्धिनी इष्टसिद्धिर्भवति स धर्म इति लक्षणेन श्येनस्य अधर्मता। अथ इदं मदिष्टसाधनम् इति ज्ञानेन कार्याकार्यानपेक्षया यत्कर्म क्रियते स धर्म इति चेत् तदा श्येनेऽपि धर्मतैव, वस्तुतस्तु श्येनादिषु इष्टसाधनत्वज्ञानं न भवति। साक्षात्परम्परया वा तस्य अप्रीतिहेतुत्वात् अधर्मत्वमेव। अतस्तत्र प्रवृत्तिर्न भवति इति। एवञ्च द्वेषाभावसहकतमिष्टसाधनताज्ञानमेव चोदना इति भट्टानामाशयः।

**प्रभाकाराः**- स्वर्गकामो यजेत इत्यादौ कामशब्दबलात् कामस्य साध्यत्वम् इति प्रतीयते। स च स्वर्गः साध्यत्वेन नियोज्ये विशेषणम्, नियोज्यश्च स्वाकामनाविषयीभूतस्वर्गसाधनं कार्यत्वेनावगच्छन् देशान्तरे कालान्तरे देहान्तरे च भोक्ष्यमाणफलं प्रति

---

6. जैमिनीयसूत्रम्.1.1.2

7. page 92–116

प्रत्यक्षक्षणिकक्रियायाः साधनत्वासम्भवं जानन् तदतिरिक्तं लिङर्थरूपं कार्यं नियोगापरपर्यायम् अपूर्वाख्यं स्वर्गसाधनमित्यवधारयति। उक्तञ्चैतत् शालिकानाथेन **नियोज्यसम्बन्धसामर्थ्यात् कालान्तरस्थायिकार्यं क्रियातिरिक्तं लिङादिभिरेवोच्यते** इति। प्रत्यक्षेण क्रियाया.क्षणिकत्वावगमात् तद्विरुद्धतया स्थायित्वकल्पनस्य अशक्यत्वात्क्रियायाः स्थायित्वकल्पनेन तस्याः स्वर्गसाधनत्वनिर्वाहात् अपूर्वकल्पनावश्यकी नास्ति इति न वाच्यम्।

यजेत स्वर्गकाम इत्यादौ स्वर्गकामपदं न कर्तृपरम्। किन्तु नियोज्यपरम्। कामनां प्रति कर्मीभूतस्य स्वर्गस्य कामनाविषतया कृतिसाध्यत्वेन प्राधान्यं स्वत एवास्तीति स्वर्गकामनावतः कर्तृत्वं नोपपद्यते। किन्तु कार्यत्वेनावगच्छन् नियोज्यत्वेनैवान्वेति। कर्तृनियोज्ययोरैक्यमपि नास्ति। ममेदं कार्यम् इति बोधो यस्य स नियोज्यः। धात्वर्थभूतक्रियानुष्ठाता कर्ता। तस्मात् द्वयोरपि व्यापारयोः भेदात् न तयो ऐक्यम्। तदुक्तं वाक्यार्थरत्ने –

**नियोज्यः स हि यः, कार्यं ममेदमिति बुध्यते।**
**कर्ता तु धातुनोपात्तं व्यापार प्रति कारणम्॥**

तेषां मते शाब्दबोधः स्वर्गकामो यजेत इत्यादौ स्वर्गकामनियोज्यं यागविषयक कार्यम् इति बोधः प्रथमः। स नियोज्यकं यागविषयं स्थायिस्वर्गसाधनमिति तृतीयः, स्वर्गकामो याग कर्ता इति चतुर्थः। एषु बोधेषु क्रमशः स्वर्गकामस्य नियोज्यत्वमधिकारित्वं कर्तृत्वमिति ज्ञायते। इष्टसाधनत्वन्तु न विध्यर्थः यागे क्षणिकतयाऽवगते तस्य बोधयितुमशक्यत्वात्।

**कौण्डभट्टस्य मतम्-** कौण्डभट्टस्तु इष्टसाधनत्वमेव विध्यर्थ इति प्रतिपादयति। तस्यायमाशयः.–.प्राचीनैः नैयायिकैः वैयाकरणैः वेदान्तिभिश्च सर्वैः इष्टसाधनत्वस्यैव प्रवृत्तिनिमित्तता अङ्गीकृता। **"शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्[8]"** इति जैमिनिरप्यसूत्रयत्। शास्त्रसम्बन्धिफलं स्वर्गादिप्रयोक्तरि कर्तरि, प्रयोक्तृफलसाधनतालक्षणत्वाद्विधेः इति तस्यार्थः। कर्त्रपेक्षितोपायता विधिः इति **"कर्ता शास्त्रार्थवत्त्वात्"**[9] इत्यधिकरणे भामत्यां स्पष्टम्। तस्माद्धितसाधनत्वमेव विध्यर्थः।

**खण्डदेवमतम् -** खण्डदेवमते लिङर्थः विचारणीय इति कृत्वा विचार्यते। खण्डदेवः वक्ति शाब्दीभावना लिङ्वाच्यः। तथाहि – **अभिधाभावनामाहुरन्यामेव लिङादयः। लिङोऽभिधा सैव च शब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिः। सम्बन्धबोधः करणं तदीयं प्ररोचनाचाङ्गतया प्रयुज्यते॥** अभिधां भावनामाहुरन्यामेव लिङादयः।

अर्थात् लिङोऽभिधा सैव च शब्दभावना भाव्या च तस्याः, पुरुषप्रवृत्तिसम्बन्धबोधः करणं तदीयं प्रयुज्यते। लिङप्रयोगेऽयं मां प्रवर्तयति इति नियमतः प्रतीतेः सत्वात् प्रेरणार्थी यः शाब्दीभावनाख्यः व्यापार एव लिङ्वाच्यः। स च व्यापारप्रवर्तकपुरुषवृत्तितात्पर्यविशेषः। वेदे पुरुषस्याभावात् शब्द एव प्रवर्तकः, सा एव शाब्दीभावना पदेनोच्यते।

नागेशस्तु **नातिरिक्तो व्यापारः प्रवर्तना** मानाभावात् किन्तु लिङाद्यन्तात्मकशब्दप्रयोगरूप एव लोकवेदसाधारणश्च इत्यभिप्रैति। उभाभ्याम् प्रेरणात्वेन तस्याः सविषयकत्वमङ्गीक्रियते। शक्यतावच्छेदकं च प्रेर्यादिधात्वर्थतावच्छेदकतया सिद्धं प्रेरणात्वम् अखण्डोपाधिरूपम। उभाभ्यां प्रेरणात्वेन तस्याः सविषयत्वमङ्गीक्रियते। शक्यतावच्छेदकं च प्रेर्यादिधात्वर्थतावच्छेदकतया सिद्धं प्रेरणत्वमखण्डोपाधिरूपम्। अनयोर्मध्येऽयमेव भेदः यत् शाब्दीभावना, आर्थीभावना चोभयत्रापि लिङ्वाच्यम्। एका लिङत्वावच्छेदेन वाच्या, एका चाख्याતત्वावच्छेदेन वाच्येति खण्डदेवाशयः। शाब्दीभावना लिङ्वाच्या, आर्थीभावना तु धातुवाच्येति। अत इष्टसाधनत्वमिति न विध्यर्थः। इदं ते इष्टसाधनम्, तस्मात् त्वं कुरु इति

---

8. जैमिनीयसूत्रम्. 1.1.24

9. व्याससूत्रम्. 2.3.33

स्वारसिकव्यवहारात्। तस्य विध्यर्थत्वे पौनरुक्त्यापत्तेः। न चेदं पौनरुकत्यं सर्वथा इष्टसाधनत्वबोधनायेति वाच्यम्। तस्मात् इत्यस्य अनन्वयापत्तेः।

वैयाकरणानां मते प्रवर्तना एव विधिः। स च व्यापारः इष्टसाधनत्वरूप एवं लोके सर्व एव पुरुषः, इदं क्रियमाणं यदिष्टसाधनमिति निश्चित्य प्रवर्तत इति सर्वेषामनुभवः। प्रयोजकवाक्य श्रवणानन्तरमेव प्रयोज्यवृद्धस्य प्रवृत्तिं दृष्ट्वा पार्श्वस्थः बालः स्वप्रवृत्तिसाधनेन प्रथमं मदिष्टसाधनमिति ज्ञानमनुमिनोति। प्रयोज्यवृद्धस्यास्मिन् कर्मणि प्रवृत्तिः इष्टसाधनताज्ञानपूर्विकाप्रवृत्तित्वात् मदीयप्रवृत्तिवदेवमिष्टसाधनत्वज्ञानस्यानुमितेः सत्वात् ज्ञानस्य कारणं किमिति प्रश्ने तज्ज्ञानं लिङादिघटितवाक्यश्रवणसमनन्तरस्यैव भवति। तस्मात् इष्टसाधनत्वं लिङ्वाच्यमिति स्वीकर्तव्यमेवेति शाब्दिकमतम्। अभिहितञ्च कौण्डभट्टेन प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वं प्रवर्तनात्वम्, तच्चेष्टसाधनत्वस्यास्ति, स च भवति विध्यर्थः। नागेशोऽपि पक्षममुं स्वीकरोति॥

**वैयाकरणमते मण्डनमिश्रसंवादः-** इष्टसाधनत्वमेव लिङर्थः। कृतिसाध्यत्वं वा बलवदनिष्टाननुबन्धित्वं वा नार्थ इति वैयाकरणपक्षः। अमुमेव पक्ष मण्डनमिश्रा अपि समर्थयन्ति। तथा चोक्तं तैः

**पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः।**
**प्रवृतिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम्॥ इति**

पुंसां पुरुषाणां, क्रियासु कर्मसु, इष्टाभ्युपायत्वाद् इष्टसाधनत्वापेक्षया, अन्यः भिन्नः कश्चन, प्रवर्तकः प्रवृत्तिजनकः, न नास्ति। पर्वतनाम् इष्टसाधनतामेव प्रवृत्तिहेतुं धर्म प्रवृत्तिजनकतावच्छेदकधर्म, प्रवदन्तिप्रवर्तनाशब्दार्थं वदन्ति इत्याशयः॥ एवं चात्र पूर्वार्धन इष्टाभ्युपायत्वात् अन्यः प्रवर्तकः न इति कथनेन इष्टसाधनत्वमेव लिङर्थः। तदपेक्षया भिन्नःधर्मः कृतिसाध्यत्वरूपो वा अनिष्टाननुबन्धित्वरूपो वा नास्तीति स्पष्टमेव प्रतीयते। एवं च मण्डनमिश्रा अपि वैयाकरणमतमेव समर्थयन्तीति कृतिसाध्यत्वादेः लिङर्थत्वं वदतां मतमयुक्तमेव।

**उपसंहारः** - प्रवृत्तिजनको धर्मः प्रवर्तना सा चेष्टसाधनता इति प्राचीनाः वैयाकरणाः मीमांसकाः नैयायिकाश्च। अपूर्व विध्यर्थ इति प्राभाकराः। वक्त्रभिप्रायो लिङर्थः इति उदयनाचार्यः। इष्टसाधनत्वं, कृतिसाध्यत्वम्, बलवदनिष्ठाननुबन्धित्वं त्रयमपि विध्यर्थः इति नव्यनैयायिकः। लिङन्तसमवेतोऽभिधाव्यापारः (शाब्दीभावना ) विध्यर्थः इति खण्डदेवः। लिङाद्यन्तघटितशब्दप्रयोग एव प्रवर्तना इति नागेशः।

**परिशीलितग्रन्थसूचिः**


1. कौण्डभट्टः, वैयाकरणभूषणसारः, शाङ्करीव्याख्योपेतः, आनन्दाश्रम मुद्रालयः,वाराणसी
2. नागेश। परमलघुमञ्जुषा (ज्यत्स्नाहिन्दीव्याख्योपेतः)। वाराणसी : वाराणसी : मोतिलाल बनारसीदास।
3. नागेशः, वैयाकरणसिद्धान्तलघुमञ्जुषा, पेरिसूर्यनारायणशास्त्री, (भावप्रकाशव्याख्यासहिता) तिरुपतिः : राष्ट्रीयसंस्कृतविद्यापीठम्।2022
4. पतञ्जलिः। व्याकरणमहाभाष्यम् )प्रदीपोद्योतसमुल्लितम्, षष्ठखण्डः। शास्त्री(, सीतारामः (सम्पा0)। चौखम्बा संस्कृत प्रतिष्ठान। देहली 2014
5. पाणिनिः। अष्टाध्यायी (पदच्छेद-वृत्ति-वार्तिक-टिप्पनी-सहिता)। पाण्डेयः, गोपालदत्तः (सम्पा0)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।2009

6. भट्टाचार्य:, विश्वनाथपञ्चाननः। न्यायसिद्धान्तमुक्तावली (किरणावलीव्याख्याव्योपेता), शास्त्री, नारायणचरणः (सम्पा0)। वाराणसी चौखम्बा संस्कृत संस्थान। 2014
7. भर्तृहरिः। 2015। वाक्यपदीयम् । तिवारी(प्रकाशकनारायणटीकाद्वयोपेतम्), हरिनारायणः (सम्पा0)। वाराणसी : चौखम्बा संस्कृत सीरीज आफिस।